गोजलम्। आर्द्रकम्। कटूनि। तिक्तानि। दीपनानि ॥ * ॥

आमवाते अपथ्यम्।

दधि:। मत्स्य:। गुड़:। क्षीरम्। उपोदिका। माष:। पिष्टकम्। दुष्टनीरम्। पूर्व्ववात:। विरुद्धाशनम्। असात्म्यम्। वेगरोध:। जागर:। विषमाशनम् ॥ * ॥

अथ शूले पथ्यम्।

छर्द्दि:। स्वेद:। लङ्घनम्। पायुवर्त्ति:। वस्ति:। निद्रा। रेचनम्। पाचनम्। अब्दोत्पन्ना: शालय:। वाट्यमण्ड:। तप्तक्षीरम्। जाङ्गलानां रस:। पटोलम्। शोभाञ्जनम्। कारवेल्लम्। वार्त्ताकु:। पक्वाम्रम्। द्राक्षा। कपित्थम्। रुचकम्। पियालम्। शालिञ्चपत्राणि। वास्तूकम्। सामुद्रम्। सौवर्च्चलम्। हिङ्गु। विश्वम्। विड़म्। शताह्वा। लशुनम्। लवङ्गम्। एरण्डतैलम्। सुरभीजलम्। तप्ताम्बु। जम्बीररस:। कुष्ठम्। लघूनि। क्षाररजांसि ॥ * ॥

शूले अपथ्यम्।

विरुद्धान्नपानम्। जागर:। विषमाशनम्। रूक्षतिक्तकषायाणि। शीतलानि। गुरूणि। व्यायाम:। मैथुनम्। मद्यम्। वैदलम्। लवणम्। कटु। वेगरोध:। शोक:। क्रोध: ॥ * ॥

अथोदावर्त्तानाहयो: पथ्यम्।

नारिकेलपुष्पमिश्रितशीतलोदकपानम्। स्नेहस्वेद:। विरेक:। वस्ति:। फलवर्त्ति:। अभ्यङ्ग:। यव:। दृष्टविण्मूत्रमारुत:। ग्राम्योदकम्। आनूपरस:। रुबुतैलम्। वारुणी। बालमूलकम्। सम्पाक:। त्रिवृत्। तिल:। सुधादलम्। शृङ्गवेरम्। मातुलुङ्गम्। यवक्षार:। हरीतकी। लवङ्गम्। रामठम्। द्राक्षा। गोमूत्रम्। लवणानि। अधोवातसमुत्थे तु। स्नेह:। स्वेद:। वर्त्ति:। वस्ति:। समीरणहरान्नपानम्। तथा पुरीषजे। वस्ति:। स्वेद:। अभ्यङ्ग:। अवगाहनम्। फलवर्त्ति:। विड्भेद्यशनपानम्। मूत्रवेगसमुत्पन्ने। त्रिविधं वस्तिकर्म्म। स्वेद:। अभ्यङ्ग:। अवगाह:। सर्पिषावपीड़नम्। उद्गारोत्थे हिक्काप्तविधि:। कासजे कासजिद्विधि:। क्षवजे। स्वेदनम्। धूम:। औत्तरभक्तिकघृतम्। क्षवप्रवर्त्तननस्यम्। ऊर्द्धजत्रुकाभ्यङ्ग:। तृष्णोत्थे शीतान्नपानम्। जृम्भोत्थे वातजित्क्रिया। निद्रावेगोत्थिते क्षीरम्। स्वप्नसंवाहनम्। बुभुक्षोत्थे स्निग्धाल्पोष्णलघुभोजनम्। वाष्पजे वाष्पसंमोक्ष:। स्वप्न:। मद्यम्। प्रियकथा। श्रमश्वाससमुत्पन्ने विश्राम:। वातहारिद्रव्यम्। शुक्रोत्थे वस्ति:। अभ्यङ्ग:। अवगाह:। चरणायुध:। शालि:। मदिरा। क्षीरम्। यौवनगर्व्वितप्रिया। छर्द्द्युत्थे लङ्घनम्। धूम:। भुक्त्वा प्रच्छर्द्दनम्। श्रम:। रूक्षान्नपानम्। विरेक:। रक्तमोक्षणम् ॥ * ॥

उदावर्त्तानाहयोरपथ्यम्।

वमनम्। वेगरोध:। शमीधान्यम्। कोद्रव:। नालीचशाकम्। शालूकम्। जाम्बवम्। कर्कटीफलम्। पिण्याकम्। सर्व्वमालुकम्। करीर:। पिष्टवैकृतम्। विष्टम्भीनि। विरुद्धानि। कषायाणि। गुरूणि ॥ * ॥

अथ गुल्मे पथ्यम्।

स्नेहस्वेद:। विरेक:। वस्ति:। बाहुसिराव्यध:। लङ्घनम्। वर्त्ति:। अभ्यङ्ग:। स्नेह:। पक्वे तु पाटनम्। सम्वत्सरसमुत्पन्नकलायरक्तशालय:। खड़:। कुलत्थयूष:। धन्वमांसरस:। सुरा। गवाजयो: पय:। मृद्वीका। परूषकम्। खर्ज्जूरम्। दाड़िमम्। धात्री। नागरङ्गम्। अम्लवेतसम्। तक्रम्। एरण्डतैलम्। लशुनम्। बालमूलकम्। पत्तूर:। वास्तूकम्। शिग्रु। यवक्षार:। हरीतकी। रामठम्। मातुलुङ्गम्। त्र्यूषणम्। सुरभीजलम्। स्निग्धोष्णबृंहणलघुदीपनान्नानि। वातानुलोमनम् ॥ * ॥

गुल्मे अपथ्यम्।

सर्व्वं वातकारि। विरुद्धाशनम्। वल्लूरम्। मूलकम्। मत्स्य:। मधुरफलम्। शुष्कशाकम्। शमीधान्यम्। विष्टम्भीनि। गुरूणि। अधोवातशकृन्मूत्रश्रमश्वासाश्रुधारणम्। वमनम्। जलपानम् ॥ * ॥

अथ हृद्रोगे पथ्यम्।

स्वेद:। विरेक:। वमनम्। लङ्घनम्। वस्ति:। विलेपी। पुरातनरक्तशालय:। जाङ्गलमृगपक्षियूषा:। मुद्गकुलत्थरसा:। रागा:। खड़ा:। काम्बलिका:। षाड़वा:। भव्यम्। पटोलम्। कदलीफलम्। पुराणकुष्माण्डम्। रसालम्। दाड़िमम्। सम्पाकशाकम्। नवमूलकम्। एरण्डतैलम्। गगनाम्बु। सैन्धवम्। द्राक्षा। तक्रम्। पुरातनगुड़:। शुण्ठी। यमानी। लशुनम्। हरीतकी। कुष्ठम्। कुस्तुम्बुरु। कृष्णम्। आर्द्रकम्। सौवीरम्। शुक्तम्। मधु। वारुणीरस:। कस्तूरिका। चन्दनम्। प्रपानकम्। ताम्बूलम् ॥*॥

हृद्रोगे अपथ्यम्।

तृट्छर्द्दिमूत्रानिलशुक्रकासोद्गारश्रमश्वासविड्श्रूणां वेगधारणम्। सह्याद्रिविन्ध्याद्रिनदीनां जलम्। मेषीपय:। दुष्टजलम्। कषाय:। विरुद्धम्। उष्णम्। गुरु। तिक्त:। अम्ल:। चिरन्तनपत्रोत्थशाकानि। क्षार:। मधूकम्। दन्तकाष्ठम्। रक्तसुति: ॥ * ॥

अथ मूत्रकृच्छ्रे पथ्यम्।

वातोद्भवे अभ्यङ्ग:। निरूह:। वस्ति:। स्नेह:। अवगाह:। उत्तरवस्ति:। सेक:। पैत्ते अवगाह:। शिशिरप्रदेह:। ग्रैष्मो विधि:। वस्तिविधि:। विरेक:। श्लेष्मोद्भवे स्वेद:। विरेक:। वस्ति:। क्षार:। यवान्नम्। तीक्ष्णम्। उष्णम्। त्रिदोषजे अभ्यङ्गपुर:सराणि त्रिमलोदितानि सर्व्वाण्यमूनि। यथा यथा दोषमयं गण:। पुरातनलोहितशालि:। गोभवतक्रपयोदधीनि। धन्वामिषम्। मुद्गरस:। सिता। पुराणकुष्माण्डफलम्। पटोलम्। महार्द्रकम्। गोक्षुरक:। कुमारी। गुवाकखर्ज्जूरनारिकेलतालद्रुमाणां शिरांसि। पथ्या। तालास्थिमज्जा। त्रपुषम्। त्रुटि:। शीतपानम्। शीताशनम्। घनीरनीरम्। हिमवालुका ॥ * ॥

मूत्रकृच्छ्रे अपथ्यम्।

मद्यम्। श्रम:। निधुवनम्। गजवाजियानम्। सर्व्वं विरुद्धाशनम्। विषमाशनम्। ताम्बूलम्। मत्स्य:। लवणम्। आर्द्रकम्। तैलभृष्टम्। पिण्याकम्। हिङ्गु। तिल:। सर्षप:। वेगरोध:। माष:। करीर:। अतितीक्ष्णम्। विदाहि। रूक्षम्। अम्ल: ॥ * ॥

अथ मूत्राघाते पथ्यम्।

अभ्यञ्जनम्। स्नेह:। विरेक:। वस्ति:। स्वेद:। अवगाह:। उत्तरवस्ति:। पुरातनलोहितशालि:। धन्वभवमांसम्। मद्यम्। तक्रम्। पय:। दधि। माषयूष:। पुराणकुष्माण्डफलम्। पटोलम्। महार्द्रकम्। तालफलास्थिमज्जा। हरीतकी। कोमलनारिकेलम्। गुवाकखर्ज्जूरनारिकेलतालद्रुमाणां मस्तकानि ॥ * ॥

मूत्राघाते अपथ्यम्।

सर्व्वाणि विरुद्धानि। व्यायाम:। मार्ग:। शीतलम्। रूक्षम्। विदाहि। विष्टम्भि। व्यवाय:। वेगधारणम्। करीरम्। वमनम् ॥ * ॥

अथाश्मर्य्यां पथ्यम्।

वस्ति:। विरेक:। वमनम्। लङ्घनम्। स्वेद:। अवगाह:। वारिसेचनम्। यवा:। कुलत्था:। प्रपुराणशालय:। मद्यम्। धन्वाण्डजसम्भवरस:। पुराणकुष्माण्डफलम्। कर्कारुकम्। गोकण्टक:। वारुणशाकम्। आर्द्रकम्। पाषाणभेदी। यवशूक:। रेणु:। छिन्ना। अश्मनां समाकर्षणम् ॥

अश्मर्य्यां अपथ्यम्।

मूत्रस्य शुक्रस्य च वेगधारणम्। अम्ल:। विष्टम्भि। रूक्षम्। गुर्व्वन्नपानम्। विरुद्धपानाशनम् ॥ * ॥

अथ प्रमेहे पथ्यम्।

पूर्व्वं लङ्घनम्। वमनम्। विरेचनम्। शोद्वर्त्तनम्। शमनम्। दीपनम्। नीवार:। कङ्गु:। यव:। वैणव:। कोरदूष:। श्यामाक:। चूर्ण:। कुरुविल्व:। मुकुष्टक:। गोधूम:। शालि:। कलम:। पुरातनकुलत्थ:। मुद्गाढ़कीचणकयूषरसा:। तिला:। लाजा:। पुरातनसुरा। मधु। वाट्यमण्ड:। तक्रम्। रासभजलम्। महिषीजलम्। कङ्क:। जाङ्गला: कपोतशशतित्तिरिलावबर्हिभृङ्गैणवर्त्तकशुकादय:। शोभाञ्जनम्। कुलकम्। कटिल्लकम्। कर्कोटकम्। तलकम्। वार्हतम्। औड़म्बरम्। लशुनम्। नवीनमोचम्। पत्तूरम्। गोक्षुरकम्। मूषिकपर्णिशाकम्। मन्दारपत्रम्। अमृता। त्रिफला। कपित्थम्। जम्बु:। कशेरु। कमलोत्पलकन्दबीजम्। खर्ज्जूरलाङ्गलिकतालतरूणां मस्तकम्। रोधम्। तिन्दुकफलम्। खदिर:। कलिङ्ग:।